|| শ্রী ||
অথ শ্রী ত্রিৱিক্রমপংডিতাচার্য়সুত শ্রী নাৰায়ণপংডিতাচার্য়ৱিৰচিতঃ
|| শ্রী মধ্ৱৱিজয়ঃ ||

১১. একাদশঃ সর্গঃ
প্রচুৰাংতৰপ্রৱচনং ফণিৰাড উপশুশ্রুৱান সসনকাদিমুনিঃ |
গগনেঽল্পদৃষ্টৱপুৰত্র জনৈঃ ৎৱৰিতং নিলীনৰুচিৰাপ পদম || ১১.১ ||

অতিচিত্রধাম্নি নিজধাম্নি ৰতং সসহস্রমস্তকমনংতমমুম |
মুনয়োঽভিৰাদ্য ৱিনয়াভৰণাঃ ৱৰমন্ৱয়ুংজত তদাঽর্থমিমম || ১১.২ ||

ভগৱত্তমস্য ৱিপুলপ্রমতেঃ সময়ং মনোহৰতমং জগতি |
মহিতং ভৱদ্ভিৰপি লোকপতে পঠতাং মুহুঃ ফলমুদেষ্যতি কিম || ১১.৩ ||

অধিকাৰিণাং ফলমলং ৱিদুষাং ভৱতি প্রৱৃত্তিৰতিৱীর্য়ৱতী |
ইতি তৎফলং সফলসংকথনো ভগৱান প্রপংচয়তু ভূৰিদয়ঃ || ১১.৪ ||

ইতি তৈৰুদীৰিতমুদাৰমতিঃ ৱচনং নিশম্য স জগাদ গিৰম |
শৃণুতাঽদৰেণ মহনীয়তমং মহনীয়পাদসময়স্য ফলম || ১১.৫ ||

ত্রিদিৱাদি লভ্যমপি নাস্য ফলং কথিতং কৃষেৰিৱ পলালকুলম |
স্ৱফলং তু মুক্তিপদমুক্তিপদং শুকশাৰদাদিপৰমার্থৱিদাম || ১১.৬ ||

পৰমাগমার্থৱৰশাস্ত্রমিদং ভজতামমানৱকলাৰচিতম |

ব্রজতামহো পৰমবৈষ্ণৱতাং ৰতয়ে স্ৱলোকমজিতো দিশতি ‖ ১১.৭ ‖

ননু তত্র ৱিশ্ৱৱিভৱৈকপদং প্রতিভাতি পূর্ণপুরুষস্য পুৰী ।
উপলভ্যতে য়দুপমানপদং প্রতিবিংবমেৱ মণিৱপ্রগতম ‖ ১১.৮ ‖

সিতসৌধসংততিরুচা স্ফুৰিতা পৰিতোঽৰুণাশ্মগৃহপংক্তিরুচিঃ ।
ইহ মচ্ছৰীৰৱলয়ে লসিতাং অনুয়াতি মূর্তিমসুৰাসু হৃতঃ ‖ ১১.৯ ‖

শবলা ৱলীকঘটিতস্ফটিকদ্যুতিভির্হৰিন্মণিময়ী ৱলভী ।
প্রতিসদ্ম ভাতি য়মুনা মিলিতা সিতসৌৰসৈংধৱপয়োভিৰিৱ ‖ ১১.১০ ‖

য়দি নাভৱিষ্যদিহ ৱিভ্রমতানিয়মো জনস্য নিলয়াৱলিষু ।
ৱিকটা ৱিটংককৃতপত্রিততিঃ কৃতকেত্যবৈক্ষ্যত কথংচন নো ‖ ১১.১১ ‖

ৱিৱিধস্তুলোপগতচিত্রপটীসুৱিতানলংবিমণিদামগণঃ ।
শৰণাংতৰেষ্ৱধিকপূৰণতঃ প্রচকাস্তি ৱিভ্রম ইৱাৱগলন ‖ ১১.১২ ‖

ৱিমলাকৃতিঃ প্রকৃতিৰেৱ মহামণিহেমময়্যখিলৱস্তুময়ী ।
ইহ সংভৱেত সকলকাংতিৰসঃ কথিতোঽধিকোক্তিভিৰতঃ কৱিভিঃ ‖ ১১.১৩ ‖

তদনাদিকালমিতমুক্তিৰতেঃঅগণয়্যশংভুমুখসংঘততেঃ ।
নগৰৈর্মহাপুৰমসংহতিমত লসতি প্রভোৰয়মহো মহিমা ‖ ১১.১৪ ‖

ভৱনং ৱিভাতি ভুৱনৈকপতেঃভুৱনত্রয়াদ্ভুতগুণাতিশয়ী ।

ৱৰমংদিৰপ্ৰকৰমধ্যগতং দ্ৱিজমংডলস্থশশিমংডলৱত ॥ ১১.১৫ ॥

স্ৱয়মিংদিৰৈৱ পতিমানকৰী গৃহকৰ্ম য়ত্ৰ কুৰুতে সুতৰাম ।
অপি কিংকৰীদশশতীমহিতা শ্ৰিয়মত্ৰ ৱৰ্ণয়তি ৱেশ্মনি কঃ ॥ ১১.১৬ ॥

কমলাপতিঃ কমলয়াঽমলয়া কমনীয়য়া কমললোচনয়া ।
অমৃতাহিৰাজমৃদুভোগগতঃ স্ৱৰতোঽপি তত্ৰ ৰমতে পৰমঃ ॥ ১১.১৭ ॥

তৰুণপ্ৰভাকৰসহস্ৰৰুচং কনকাংবৰং মণিময়াভৰণম ।
হসিতাননেংদুমৰৱিংদদৃশং তমৰীংদ্ৰধাৰিণমনুস্মৰত ॥ ১১.১৮ ॥

গণয়েদ ৰমাঽস্য ন গুণানখিলান চতুৰাননশ্চতুৰৱাগপি নো ।
ন ৱয়ং সহস্ৰৱদনা অপি তান অপৰোদিতানতিৱদেম পুনঃ ॥ ১১.১৯ ॥

ৱিধয়ো ৱিহংগপতয়োঽগণিতা ৰমণীয়ুতাশ্চ ফণিপেংদ্ৰমুখাঃ ।
পৰয়োগভূৱিসুখভোগমিতা অৱলোক্য তং দধতি মোদৰসম ॥ ১১.২০ ॥

সচতুৰ্ভুজা ৱনজপত্ৰদৃশো ৱৰৱেষিণোঽত্ৰ সপিশংগপটাঃ ।
অৰুণপ্ৰভাশ্চ তৰুণাভ্ৰৰুচো ৱিচৰংতি নাথৰুচয়ঃ পুৰুষাঃ ॥ ১১.২১ ॥

ভগৱৎসমীপমুপয়াতৱতাং প্ৰমদো ন কেৱলমলঙ্কতুলঃ ।
অপি তস্য লোকমতিলোকগুণং ভজতাং সুদুৰ্লভমভূৱিশুভৈঃ ॥ ১১.২২ ॥

ন ভৱংতি য়ত্ৰ মৃতিজন্মজৰাঃ ত্ৰিৱিধং ভয়ং কিমুত দুঃখগণঃ ।

অপৰং চ কিংচিদশুভং ন ভৱেত ন গুণাদি তৎপ্ৰভৱমূলমপি ‖ ১১.২৩ ‖

অনুভূয়তে সুখমনংতসখৈঃ সকলৈৰলংমতিপদং সততম |
অপি তাৰতম্যসহিতৈঃ স্ৱগুৰুপ্ৰৱণৈঃ পৰস্পৰমুৰুপ্ৰণয়ৈঃ ‖ ১১.২৪ ‖

অতিসুংদৰাঃ সুৰভয়ঃ পুৰুষাঃ হৰিচংদনেন নৱচংদ্ৰৰুচা |
চলচাৰুচামৰধৰানুচৰা ৱিচৰংতি নিত্যতৰুণা ইহ তে ‖ ১১.২৫ ‖

সৱিলাসলাস্যপৰিতুষ্টদৃশো মৃদুগীতৱাদ্যমুদিতশ্ৰৱণাঃ |
অনুৰংজয়ংতি নৱকংজদৃশো ৰমণা অমী স্ৱৰমণীস্তৰুণীঃ ‖ ১১.২৬ ‖

পৰিণায়কানুপৰনাভিমুখান অনু নিস্সৰংতি হৰিণীনয়নাঃ |
ৱিমলাদ ৱিমানৱলয়াচ্ছনকৈঃ শশিমংডলাদিৱ ৰুচো ৰুচিৰাঃ ‖ ১১.২৭ ‖

অৰুণাশ্মৱৰ্ণতনৱস্তনৱঃ শুভহাৰসন্নিভৰুচোঽপ্যপৰাঃ |
হৰিনীলনীলৰুচয়োঽত্ৰপৰাঃ প্ৰকটীভৱংতি ৱিৱিধাভৰণাঃ ‖ ১১.২৮ ‖

সুচিৰদ্যুতীৰ্দধতি সূক্ষ্মতৰং স্ৱয়মংবৰং চ খলু বিভ্ৰতি য়াঃ |
শুকনিঃস্ৱনা ধ্ৰুৱমিমা অপৰাঃ সুপয়োধৰা জলধৰাৱলয়ঃ ‖ ১১.২৯ ‖

সমতীতৱিদ্ৰুমভুৱাং সুদৃশাং পদপল্লৱাগ্ৰনখৰক্তৰুচীঃ |
পৰভাগতঃ স্ফটিককুট্টিমভূঃ প্ৰকটীকৰোতি ন পুৰা প্ৰকটাঃ ‖ ১১.৩০ ‖

হৰিণীদৃশাং নিৱসনানি বৃহৎসুনিতংববিংবৰুচিৰোৰুৰুচা |

শবলদ্যুতীনি মদনস্য জগজ্জয়ৱৈজয়ংত্য ইতি নিশ্চিনুমঃ || ১১.৩১ ||

কৰপল্লৱৈস্তৰলিতৈৰ্ললিতৈঃ অসকৃত ক্ৱণৎকনককংকণকৈঃ |
নৱৰোমৰাজিৱলিৱল্লুমৃদুপ্রতনূদৰৈৰতিমনাক তৰলৈঃ || ১১.৩২ ||

কুচকুংভপূৰ্ণতৰকাংতিসুধাৰসশেষবিংদুৱিসৰচ্ছৱিভিঃ |
ৱৰহাৰৰাজিভিৰুতানুপদং পৰিলোঠিতাভিৰশনৈৰুৰসি || ১১.৩৩ ||

অপি লীলয়া কুৱলয়োল্লসিতৈঃ অপৰৈঃ কৰৈঃ সহচৰীনিহিতৈঃ |
ৱদনৈঃ শুচিস্মিতকটাক্ষৰসৈঃ চলকুংডলোল্লসিতগংডয়ুগৈঃ || ১১.৩৪ ||

প্রগতাসু তাসু ৱণিতৈ ৰশনামণিনূপুৰৈৰিৱ পুৰা গদিতাঃ |
অনুৱীক্ষিতুং তনুৱিলাসমিমং তৰুণা ভৱংত্যথ নিৱৃত্তমুখাঃ || ১১.৩৫ ||

অনুপালিতাঃ স্ৱদয়িতৈৰ্দয়িতাঃ কথমপ্যুপেত্য কুচভাৰনতাঃ |
শনকৈঃ পুনস্তদৱলংববলাত কিল তা ৱিশংতি পৰমোপৱনম || ১১.৩৬ ||

হসিতপ্রসূননিকৰোৰুভৰপ্রণমৎসুৱৰ্ণমণিসৰ্ৱতৰুন |
উপগূহয়ন্নমৃতসিংধুসখঃ পৱনো ন কস্য সুখমেধয়তি || ১১.৩৭ ||

ৱৰপাৰিভদ্রকসুকল্পতৰুৱ্ৰজপাৰিজাতহৰিচংদনৱত |
সহিতং সমাদিপদতাননগৈঃ পৰিভূষয়ংতি তদহো ঋতৱঃ || ১১.৩৮ ||

স্মিতমাধৱীকুসুমৰম্যতৰৌ নৱচংপকাদিকুসুমোল্লসিতৌ |

মধুমাধৱৌ মধুপগীর্মধুৰৌ মধুজিৎপ্রয়ান প্রমদমানয়তঃ || ১১.৩৯ ||

নৱমল্লিকাস্রজমভীষ্টতমঃ শুচিসংভৱাং প্রণয়িনীশিৰসি |
কলয়ন স্ৱয়ং ন কুশলেতি কিল প্রতিঘট্টয়ত্যুৰুকুচাৰুৰসা || ১১.৪০ ||

মধুৰস্ৱৰাস্ততপতত্রততিপ্রকটাংতপংক্তিধৃতনেত্ৰৰুচঃ |
শিখিনোঽনুয়াংতি হি সহস্রদৃশং জলদর্তু লক্ষ্মনিজনৃত্তমহে || ১১.৪১ ||

শৰদোল্লসৎকুৱলয়েক্ষণয়া ৱিকচাৰৱিংদৰুচিৰাননয়া |
প্রিয়য়া চ শোভনশুকস্ৱনয়া ৰমতে জনো মুখৰ হংসকয়া || ১১.৪২ ||

অভিনংদয়ন হিমঋতুং সুসখা স্ফটিকাচলচ্ছলহিমাধিকৃতম |
ফলিনীকুলং কুসুময়ন শিশিৰো হসতীৱ ফুল্লনৱকুংদৰুচা || ১১.৪৩ ||

হিমশীতৱৰ্ষপৰিতাপপুৰস্সৰদোষমূলমিহ নর্তুগুণঃ |
প্রিয়মেৱ সাধয়তি নিত্যমহো স ৱিমুক্তিমানিতি ৱিমুক্তিমতাম || ১১.৪৪ ||

অমৃতস্রগুত্তমফলপ্রসৱান অমৃতায় তত্র জনতাঽৰ্পয়তি |
উপভোক্তুমপ্যৱিধিবংধৱশা প্রকৃতিং প্রয়াতি সকলোঽপি সদা || ১১.৪৫ ||

প্রমদাতিৰেকমুপয়াতৰতা প্রমদাগণেন চৰতোপৱনে |
উপগীয়তে স্ম মধুৰং মধুজিচ্চৰিতং সকাংততিনা সততম || ১১.৪৬ ||

ললনা ললংত্যভিৱৰং প্রৱৰা ললিতা লুনংতি কুসুমানি পৰাঃ |

ইতৰাঃ স্ৰজো ৱিৰচয়ংতি পতীন অনুৰংজয়ংতি ন হি কাশ্চন নো || ১১.৪৭ ||

ৱনলীলয়া ৱিৱিধয়া মুদিতাঃ তৰুণা ঘনস্তননতাস্তৰুণীঃ |
সুলতালয়েষু পৰিৰভ্য ৰতিং ৱদনাৰৱিংদমধুপা দধতি || ১১.৪৮ ||

ৰসিকাঃ সুধাম্সু সৰসীষু ততো ৰুতনূপুৰানুকৃতসাৰসিকাঃ |
ৱিহৰংতি সাকমৱগাহ্য ধৱৈঃ জলমড্ডুকোৎসৱহসদ্ৱদনাঃ || ১১.৪৯ ||

ৱিৱিধা ৱিধায় ৱিহৃতীঃ সলিলে ৱিকটেষু ৱিদ্ৰুমতটেষু গতাঃ |
সুৰভিং সুৱৰ্ণমথ ৱৰ্ণকমাদদতে সখীকৰগতং মহিলাঃ || ১১.৫০ ||

জঘনাংশুকৈৰৱয়ৱাভৰণৈঃ কুচকুংকুমৈশ্চ কচমাল্যৱৈঃ |
নয়নাংজনৈৰপি মিথোজ্ঞদৃশাং ঘটিতৈৰলংকৃতিৰলং ক্ৰিয়তে || ১১.৫১ ||

তনুমধ্যমা নিজগৃহাণি গতাঃ সমমাত্মনামসুসমৈৰসমৈঃ |
অমৃতং পিবংত্যসুলভং ভৱিভিঃ চষকৈৰ্মহাৰজতৰত্নময়ৈঃ || ১১.৫২ ||

মৃদুকম্ৰশয্যমনুৰাগৰতাং মণিমংচমংচিতদৃশোঽৱসৰে |
অপি চোদিতা অধিৰুহংতি শনৈঃ ৱিনয়ো হি ভূষয়তি সৰ্ৱৰসম || ১১.৫৩ ||

অভিকাংতমুন্নমিতকাংতকুচা কিল বধ্নতী সকুসুমাং কবৰীম |
সুমুখী সুলক্ষ্যভুজমূলৱলিঃ পৰিৰভ্যতে প্ৰণয়িনাঽতিৰসাত || ১১.৫৪ ||

পৃথুৱৃত্ততুংগকঠিনোৰসিজদ্ৱয়ৱাৰিতায়তনিজাংতৰয়োঃ |

ভুজয়োর্য়ুগেন ৰমণো ৰমণীং পৰিৰভ্য কোঽত্ৰ ৰময়েন্ন সুখী || ১১.৫৫ ||

স্মিতফুল্লমুল্লসিতঝিল্লিলসন্মণিকুংডলং মৃদুকটাক্ষপটু |
নিভৃতো নিৰীক্ষ্য সুচিৰং সুতনোঃ প্ৰতিচুংবতি প্ৰিয়তমো ৱদনম || ১১.৫৬ ||

নতমুন্নময়্য মুখচংদ্ৰমসং পৰিৰংভসংভৃতমুদা সুদৃশঃ |
উপৰম্যতে ন তৰুণেন চিৰং মধুৰাধৰামৃতৰসং পিবতা || ১১.৫৭ ||

ৰভসাৱপাতিতপৃথূৰসিজঃ পৰিৰভ্য তৎক্ষণৱিয়াততৰঃ |
মণিতাদিসৌৰতৱিতানপটূ ৰময়ত্যমূন য়ুৱতিসংঘ উত || ১১.৫৮ ||

অতিলৌকিকান ৰময়তো ৰমণান ৰময়ংত্যলৌকিকগুণা ললনাঃ |
অনুৰূপৰূপমতিলোকসুখং তদলৌকিকং নিধুৱনং লসতি || ১১.৫৯ ||

ন ৰতিঃ শ্ৰমাদিখচিতা নিয়মাদ ৱিৰহৱ্যথাঽপি ন ৱধূৱৰয়োঃ |
প্ৰতিকামিনীপ্ৰণয়তঃ কলহো ন সমস্তি দোষৰহিতে হি পদে || ১১.৬০ ||

সুখসংৱিদাত্মকতয়া ৱপুষাং সুৰভিৎৱমেৱ বহিৰংতৰপি |
হৰিধাম্নি দংপতিগণস্য ততো ননু মান্যতেঽপি মুনিভিঃ সুৰতম || ১১.৬১ ||

শৃণুতাপ্যলোকৱিষয়ং ৱিষয়ং সকলস্য মুক্তনিকৰস্য দৃশাম |
ৱপুৰিংদিৰাপতিৰমংদৰসং ননু সুংদৰং প্ৰকটয়ত্যনিশম || ১১.৬২ ||

মণিৰাজিৰাজিত মহামকুটং শিতিকাংতকুংতলসহস্ৰতয়ম |

www.yousigma.com

অলিকাৰ্ধচংদ্ৰৱিলসত্তিলকং শ্ৰৱণোল্লসন্মকৰকুংডলয়ুক ‖ ১১.৬৩ ‖

পৰিপূৰ্ণচংদ্ৰপৰিহাসিমুখং জলজায়তাক্ষমৰুণোষ্ঠপুটম |
হসিতাৱলোকললিতৈৰতুলৈঃ অভিনংদয়ত প্ৰণতমাত্মজনম ‖ ১১.৬৪ ‖

নৱকংবুকংঠমহিমাংশুমহো মহিমোপলেংদ্ৰৱৰহাৰধৰম |
ৰমণীয়ৰত্নগণৱিদ্ধলসদ্ৱলয়াংগুলীয়কৱৰাংগদৱত ‖ ১১.৬৫ ‖

ৰৱিচক্ৰৰুক্প্ৰকৰচক্ৰকৰং ৱিধুবিংবকংবু মধুৰাংবুৰুহম |
জ্ৱলনজ্ৱলদ্গদমুদাৰধনুঃ পৃথুৱৃত্তহস্তমতিতাম্ৰতলম ‖ ১১.৬৬ ‖

ৱৰপীৱৰাংসমধিৰাজদুৰোমণিমংটপাগ্ৰ্যৱিলসৎকমলম |
সজগদ্দ্ৱিসপ্তকতনূদৰকং শুভনাভিকংজগতকালিনুতম ‖ ১১.৬৭ ‖

অতিকাংতকাংচিপদকাংচিমিলত্তপনীয়ভংগৰুচিপিংগপটম |
ৱৰহস্তিহস্তসদৃশোৰুয়ুগং ক্ৰমৱৃত্তচাৰুতৰজংঘমুত ‖ ১১.৬৮ ‖

ৱৰনূপুৰং পৰমৰুক্প্ৰপদং নৱৱিদ্ৰুমদ্যুতিনখাৱলিমত |
অৰিৱাৰিজধ্ৱজকলংকলসৎপদপাংসুপাৱিতজগত্ত্ৰিতয়ম ‖ ১১.৬৯ ‖

নিখিলাগমাৱগমিতৈৰমিতৈঃ সুখসংৱিদাদিভিৰনংতগুণৈঃ |
প্ৰপদাদিকাংতসকলাৱয়ৱাকৃতিভিঃ সদৈক্যৱদদোষলৱম ‖ ১১.৭০ ‖

অধিকাৰিণাং গুণৱিশেষৱশাদ দ্ৱিপদাদ্যনংতচৰণাংততয়া |

অতিভাসিতং ঘনগুণাপঘনৈঃ ইতৰৈষ্চ তত্তদুচিতৈ ৰুচিতৈঃ || ১১.৭১ ||

নৰভানুভাঃ কনককাংতিপৰং ৱৰহাৰহাৰি হৰিনীলহৰিত |
শবলপ্ৰভাদিৱিৱিধদ্যুতিমত সুখবোধসৌৰভসুৰূপগুণম || ১১.৭৪ ||

আষ্চৰ্য়ৰত্নেশ ৱধিকং জগত্ত্ৰয়েপ্যাষ্চৰ্য়মাষ্চৰ্য়মহো মুহুৰ্মুহুঃ |
সৌংদৰ্য়সাৰৈকৰসং ৰমাপতেঃ ৰূপং তদানংদয়তীহ মোক্ষিণঃ || ১১.৭৩ ||

ইজ্যতে য়জ্ঞশীলৈঃ স য়জ্ঞঃ প্ৰাজ্ঞমধ্যে পৰঃ প্ৰোচ্যতেঽন্যৈঃ |
গীয়তে গেয়কীৰ্তিঃ সুগীতৈঃ ৱিধ্যবদ্ধৈঃ সদাঽঽনংদসাংদ্ৰৈঃ || ১১.৭৪ ||

ৱৈকুংঠে তে শ্ৰীৱিশেষা জনানামত্যাশ্চৰ্য়ং চিত্তৱাচামভূমিঃ |
ৱৈকুংঠেতে শ্ৰীৱিশেষাজনানামুক্তশ্লাঘ্যে য়ুক্তমেতাদৃশৎৰম || ১১.৭৫ ||

য়ংয়ং সুখী কাময়তেঽৰ্থমত্ৰ সংকল্পমাত্ৰাত সকলোঽপি স স্যাত |
ইত্যেৱ ৱেদা অপি ৱেদয়ংতি মুক্তিং ততঃ কো ৱিভৱাতিৰেকঃ || ১১.৭৬ ||

মহানংদতীৰ্থস্য য়ে ভাষ্যভাৱং মনোৱাগ্ভিৰাৱৰ্তয়ংতে স্ৱশক্ত্যা |
সুৱাদ্যা নৰাংতা মুকুংদপ্ৰসাদাদ ইমং মোক্ষমেতে ভজংতে সদেতি || ১১.৭৭ ||

|| ইতি শ্ৰীমৎকৱিকুলতিলক ত্ৰিৱিক্ৰমপংডিতাচাৰ্য়সুত
শ্ৰীনাৰায়ণপংডিতাচাৰ্য়ৱিৰচিতে শ্ৰীমধ্ৱৱিজয়ে
আনংদাংকিতে একাদশঃ সৰ্গঃ ||